"भानुर्गन्धाङ्कितदेहरक्तः श्यामान्वितः पिङ्गलनेत्रकान्तिः। पित्तात्मकोऽयं समगात्रयष्टिः प्रतापयुक् सत्त्वगुणोऽल्परोमा। सञ्चारयुक् सङ्कुचितार्थवाक्यः स्वल्पप्रजो दैविकबुद्धियुक्तः"। स च प्राच्या दिशः स्वामी। पुंग्रहः क्षत्रियजातीयः अस्थिसारः देवस्वरूपश्च। बृहज्जातके तट्टीकायाञ्च सूक्ष्म द्रष्टव्यम्। ग्रहयज्ञशब्दे तन्मन्त्रभेदादिकं द्रष्टव्यम्। जन्मकाले लग्नादिकस्थस्य तस्य फलं जातकपद्धतावुक्तं यथा

"लग्ने१ सूर्य्ये स्वल्पकेशः प्रचण्डो मानी क्रोधी नेत्ररुक् निष्टुरश्च। शूरोऽत्यन्तस्थालसः कर्कशाङ्गो नीचे निःस्वो भूपजोऽर्थाच्च हीनः। धने२ दिनेशे बहुवित्तव्ययचतुष्पदाढ्योऽपि नरो भवेत् सः। विनष्टसौभाग्यसुखो नृपालचौरैर्हृतार्थो मुखरोगदुःखी। सहजरश्मौ सहजे३ बलाढ्यो धीविक्रमैर्लोकमनोभिरामः। विनष्टबन्ध्वादरजो नरः स्याद्दुष्टारिपक्षस्य विनाशकश्च। मित्रे मित्रे४बन्धुभवाहनैः स्याद्धीनः सौख्यैर्मानसात्त्वैश्च हीनः। मातास्वादेनीचकारी नरो वै सेवाकारी भूपतेः कुत्सितस्य। सूनौ५ भानौ सूनुसौख्येन हीनो दुर्गारण्यक्ष्माधरेषूपरक्तः। मेधायुक्तो मन्त्रवक्ता प्रवस्यत्स्वल्पायुर्वै जायते मानवोऽयम्। कुमुदगहनशत्रौ शत्रुभावं प्रपन्ने भवति नरपतिर्वा दण्डनेता धनाढ्यः। प्रबलजठरवह्निर्भूरिकामो गुणी वै बलरिपुसहितः स्यात् पूरुषः कीर्त्तिदेवम्। भार्य्याभावे७ भास्करे चाभिभूतो भार्य्याभिर्वै हीनकान्तीरमाढ्यः। भूपाद्बन्धे पीड़ितोऽमार्गगामी सुश्रीहीनो मानवः शीलहीनः। निधनगे८ नलिनीदयिते नरो नयनयोर्विकलत्वयुतो भवेत्। तनुधनात्मजजीवितसौख्यभागभिमतेन जनेन वियोजितः। धर्मे९स्थिते धर्मकरे धनेन धनेन युक्तो बहुमित्रपुत्रः। सुरेन्द्रवृन्दारकवृन्दभक्तिः पितृप्रियो वैरकरः सहृदः। गगने१०गे गगनस्य मणौ नरो मतिधनात्मजवैभवशौर्य्ययुक्। रतिबलश्रुतकार्य्यसमृद्धिभाग् भवति वाहनवान् नृपसद्गुणः। प्राप्तिः११स्थाने सप्तसप्तौ नरः स्यात् प्राज्ञो विद्याया वृद्ध्या समेतः। मन्त्री द्वेष्यः सङ्खलः सिद्धकर्मा क्रूरो कान्तानिर्जितो वध्यभृत्यः। व्यये१२ सूर्य्ये नरः काणः पितृद्वेषी बलोज्झितः। बन्ध्यापतिर्विह्वलाङ्गः क्षुद्रस्तु पतितो भवेत्"। मेषादिस्थस्य तस्य फलं जातकशब्दे ३०८८ पृ० द्रष्टव्यम्।

**सूर्य्यकान्त** पु० सूर्य्यस्य कान्तः प्रियः। १स्फटिकमणौ हला० २सूर्य्यसम्पर्कात् यत्राग्निरुत्पद्यते तादृशे (आतसी) मणौ च हेमच०।

**सूर्य्यकान्ति** पु० सूर्य्येण कान्तिर्यस्य। अतस्यां पुष्परागवृक्षविशेषे शब्दच०। ६त०। २सूर्य्यस्य दीप्तौ स्त्री।

**सूर्य्यकाल** पु०। सूर्य्योपलक्षितः कालः शाक०। दिवसे शब्दच०।

**सूर्य्यग्रहण** न० सूर्य्यस्य राहुणा तदाक्रान्तभूच्छायया ग्रहणमाक्रमणम्। ज्योतिषोक्ते राहुर्बिम्बभूमिच्छायया सूर्य्यमण्डलस्य आक्रमणरूपे व्यासे सूर्य्यग्रहादयोऽप्यत्र। उपरागशब्दे १२८५ पृ० दृश्यम्।

**सूर्य्यज** पु० सूर्य्यात् जायते जन–ड। १शनिग्रहे २यमे ३वैवस्वते मनौ ४सुग्रीववानरे च जटा०। सूर्य्यपुत्रादयोऽप्यत्र। ५यमुनायां स्त्री हेमच०। ६कर्णे पु०।

**सूर्य्यपत्त्र** पु० सूर्य्य इव रक्तं पत्त्रमस्य। आदित्यपत्त्रे राजनि०।

**सूर्य्यभक्त** पु० सूर्य्यस्य भक्त इव प्रियः। १बन्धूकवृक्षे। ६त०। २सूर्य्यभक्तियुते त्रि० मेदि०। [२पुष्परक्ते शब्दच०।

**सूर्य्यमणि** पु० सूर्य्यप्रियः मणिः। १सूर्य्यकान्तमणौ हेमच०।

**सूर्य्यलता** स्त्री सूर्य्यभक्ता लता। आदित्यभक्तायाम् राजनि०।

**सूर्य्यवल्ली** स्त्री सूर्य्यतुल्यपुष्पिका वल्ली। अर्कपुष्पिकावृक्षे रत्न०।

**सूर्य्यसारथि** पु० ६त०। अरुणे गरुड़ाग्रजे शब्दच०। सूर्य्यसूतादयोऽप्यत्र।

**सूर्य्या** स्त्री सूर्य्यस्य भार्य्या टाप्। १अमानुष्यां संज्ञानाम्न्यां सूर्य्यभार्य्यायाम्। मानुष्यां कुन्त्यान्तु ङीपि। सूरीत्येव।

**सूर्य्यालोक** पु० ६त०। आतपे रौद्रे राजनि०।

**सूर्य्यावर्त्त** पु० सूर्य्यं इवावर्त्तते आ+वृत–अच्। (हुड़हुड़िया) २क्षुपभेदे (सुलफिया) २शाके च रत्नमा०। ३आदित्यभक्तायां स्त्री राजनि०।

**सूर्य्याश्मन्** पु० सूर्य्यप्रियः अश्मा। सूर्य्यकान्तमणौ हेमच०।

**सूर्य्याह्व** पु० सूर्य्यमाह्वयते स्पर्द्धते वर्णेन आ+ह्वे–क। १ताम्रे त्रिका०। सूर्य्यस्य आह्वाऽऽह्वायस्य। २अर्कवृक्षे पु० राजनि०। [वसायाम् अमरः २तयोर्मेलने च।

**सूर्य्येन्दुसङ्गम** पु० सूर्य्यस्य इन्दोश्च सङ्गमः कालः। १अमा-

**सूर्य्योढ** पु० सूर्य्यं ऊढोऽस्तगतो यत्र। १सूर्य्यास्तमयकाले हेमच०। "दिवातिथौ तु विमुखे गते यत् पातकं भवेत्। तदेवाष्टगुणं विद्यात् सूर्य्योढे विमुखे गते" भा० त०। सूर्य्येण सूर्य्यास्तकालेन ऊढः प्रापितः वह–क्त। २तत्कालागतातिथौ "सूर्य्योढस्तु स सम्प्राप्तो यः सूर्य्येऽस्तं गतेऽतिथिः" हेमच०। [वास्यायां शब्दार्थः।

**सृ** गतौ स्थितौ चु० उभ० सक० सेट्। सारयति ते असू-